श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमन्महाभारते

# ॥ श्रीकृष्णद्वादशनामस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीकृष्णद्वादशनामस्तोत्रम् ॥

श्रीकृष्ण उवाच
किं ते नामसहस्रेण विज्ञातेन तवाऽर्जुन।
तानि नामानि विज्ञाय नरः पापैः प्रमुच्यते॥ १ ॥

प्रथमे तु हरिं विद्यात् द्वितीयं केशवं तथा।
तृतीयं पद्मनाभं च चतुर्थं वामनं स्मरेत्॥ २ ॥

पञ्चमं वेदगर्भं च षष्ठं च मधुसूदनम्।
सप्तमं वासुदेवं च वराहं चाऽष्टमं तथा॥ ३ ॥

नवमं पुण्डरीकाक्षं दशमं हि जनार्दनम्।
कृष्णमेकादशं विद्यात् द्वादशं श्रीधरं तथा॥ ४ ॥

द्वादशैतानि नामानि विष्णुप्रोक्तान्यनेकशः।
सायंप्रातः पठेन्नित्यं तस्य पुण्यफलं शृणु॥ ५ ॥

चान्द्रायणसहस्राणि कन्यादानशतानि च।
अश्वमेधसहस्राणि फलं प्राप्नोत्यसंशयः॥ ६ ॥

अमायां पौर्णमास्यां च द्वादश्यां तु विशेषतः।
प्रातःकाले पठेन्नित्यं सर्वपापैः प्रमुच्यते॥ ७ ॥

॥ इति श्रीकृष्णद्वादशनामस्तोत्रम् संपूर्णं ॥